श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ निर्यातनापद्धतिः अष्टमी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*] This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ निर्यातनापद्धतिः अष्टमी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अभिषेकोत्सवात् तस्मात् यस्या निर्यातनोत्सवः।
अत्यरिच्यत तां वन्दे भव्यां भरतदेवताम्॥ ८.१ ॥

उपास्य वर्षाणि चतुर्दश त्वाम्
    उत्तारिकामुत्तरकोसलस्थाः।
सनन्दनाद्यैरपि दुर्विगाहं
    सान्तानिकं लोकमवापुरग्र्यम्॥ ८.२ ॥

पादावनि ! प्रत्ययितो हनूमान्
    सीतामिव त्वां चिरविप्रयुक्ताम्।
प्रणम्य पौलस्त्यरिपोरुदन्तं
    विज्ञापयामास विनीतवेषः॥ ८.३ ॥

तवाभिषेकान्मणिपादरक्षे !
    मूले निषेकादिव वृद्धियोग्यात्।
जहुस्तदैव त्रिदशाङ्गनानां
    प्रम्लानतां पत्रलताङ्कुराणि॥ ८.४ ॥

सर्वतस्त्वदभिषेकवासरे
    सम्यगुद्धृतसमस्तकण्टके।
राघवस्य विपिनेषु पादुके !
    यत्र कामगमता व्यवस्थिता॥ ८.५ ॥

किं चतुर्दशभिरेव वत्सरैः
    नित्यमेव मणिपादुके युवाम्।

पादयोस्त्रिभुवनाधिराजयोः
    यौवराज्यमधिगच्छतं स्वयम्॥ ८.६ ॥

रामस्य राक्षसवधत्वरितस्य काले
    पादावनि ! प्रकटयन्निव पार्ष्णिगुप्तिम्।
आचित्रकूटमधिगम्य शशंस वार्ताम्
    अव्याहतत्वदभिषेकमृदङ्गनादः॥ ८.७ ॥

भद्राणि देवि ! जगतां प्रतिपादयिष्यन्
    प्रागेव येन भवतीं भरतोऽभ्यषिञ्चत्।
मन्ये कपीश्वरविभीषणयोर्यथावत्
    सन्तन्यते स्म तत एव किलाभिषेकः॥ ८.८ ॥

संभिद्यमानतमसासरयूपनीतैः
    संवर्धितस्तव शुभैरभिषेकतोयैः।
मन्ये बभूव जलधिर्मणिपादरक्षे !
    रामास्त्रपावकशिखाभिरशोषणीयः॥ ८.९ ॥

पादावनि ! त्वदभिषेचनमङ्गलार्थं
    भेरीशतं भृशमताड्यत यत् प्रतीतैः।
आकर्ण्य तस्य सहसा तुमुलं निनादं
    लङ्काकवाटनयनानि निमीलितानि॥ ८.१० ॥

तापोद्गमस्त्वदभिषेकजलप्रवाहैः
    उत्सारितस्त्वरितमुत्तरकोसलेभ्यः।
लेभे चिराय रघुपुङ्गवपादरक्षे !
    लङ्कावरोधसुदृशां हृदयेषु वासम्॥ ८.११ ॥

आवर्जितं विधिविदा मणिपादरक्षे !
    पद्मासनप्रियसुतेन पुरोहितेन।
आसीन्निदानम् अभिषेकजलं त्वदीयं
    नक्तञ्चरप्रणयिनीनयनोदकानाम्॥ ८.१२ ॥

देवि ! त्वया स्नपनसंपदि संश्रितायां
　　दग्धे पुरे दशमुखस्य वलीमुखेन।
आसीत् ततः प्रभृति विश्वजनप्रतीतम्
　　अद्भ्योऽग्निरित्यवितथं वचनं मुनीनाम्॥ ८.१३ ॥

आयोध्यकैस्त्वदभिषेकसमिद्धहर्षैः
　　आध्मापिताः श्रुतिसुखं ननु ते तदानीम्।
रामस्य राक्षसशिरोलवनेऽप्यशाम्यन्
　　येषां ध्वनिर्विजयशंखरवो बभूव॥ ८.१४ ॥

प्रथयितुम् अभिषेकं पादुके ! तावकीनं
　　दुरितशमनदक्षे दुन्दुभौ ताड्यमाने।
सपदि परिगृहीतं साध्वसं देवि ! नूनं
　　दशवदनवधूनां दक्षिणैर्नेत्रकोशैः॥ ८.१५ ॥

रघुपतिपदरक्षे ! रत्नपीठे यदा त्वाम्
　　अखिलभुवनमान्याम् अभ्यषिञ्चत् वसिष्ठः।
दशमुखमहिषीभिर्देवि ! बाष्पायिताभिः
　　स्तनयुगमभिषेक्तुं तत्क्षणादन्वमंस्थाः॥ ८.१६ ॥

रामास्त्राणि निमित्तमात्रमिह ते लब्धाभिषेका स्वयं
　　रक्षस्तत् क्षपयांचकार भवती भद्रासनस्थायिनी।
यद्दोष्णाम् अतिवेलदर्पदवथुज्वालोष्मलानां तदा
　　निष्पिष्टैः कलधौतशैलशिखरैः कर्पूरचूर्णायितम्॥ ८.१७ ॥

श्रुत्वैवं हनुमन्मुखाद् रघुपतेः प्रत्यागतिं तत्क्षणात्
　　आसीदद्भरतानुवर्तनवशाद् आरूढकुम्भस्थलाम्।
कालोन्निद्रकदुष्णदानमदिरामाद्यद्द्विरेफध्वनि-
　　श्लाघाचाटुभिरस्तुतेव भवतीं शत्रुञ्जयः कुञ्जरः॥ ८.१८ ॥

प्रत्यागतस्य भवतीम् अवलोक्य भर्तुः
　　पादारविन्दसविधे भरतोपनीताम्।

पूर्वाभिषेकविभवाभ्युचितां सपर्यां
    मध्ये सताम् अकृत मैथिलराजकन्या॥ ८.१९ ॥

संप्रेक्ष्य मैथिलसुता मणिपादरक्षे !
    प्रत्युद्गतस्य भवतीं भरतस्य मौलौ।
निर्दिश्य सा निभृतम् अञ्जलिना पुरस्तात्
    तारादिकाः प्रियसखीरशिषत् प्रणन्तुम्॥ ८.२० ॥

तुल्येऽपि देवि ! रघुवीरपदाश्रयत्वे
    पूर्वाभिषेकमधिगम्य गरीयसी त्वम्।
तेनैव खल्वभजतां मणिपादरक्षे !
    रक्षःप्लवङ्गमपती भवतीं स्वमूर्ध्ना॥ ८.२१ ॥

निर्वृत्तराक्षसचमूमृगयाविहारो
    रङ्गेश्वरः स खलु राघववंशगोप्ता।
वंशक्रमादुपनतं पदमाददानो
    मान्यं पुनस्त्वयि पदं निदधे स्वकीयम्॥ ८.२२ ॥

तत्तादृशोः चरणयोः प्रणिपत्य भर्तुः
    पौरास्त्वया विधृतयोः प्रतिपन्नसत्त्वाः।
प्राप्ताभिषेकविभवामपि पादुके ! त्वाम्
    आनन्दबाष्पसलिलैः पुनरभ्यषिञ्चन्॥ ८.२३ ॥

मातस्त्वयैय समये विषमेऽपि सम्यक्
    राजन्वतीं वसुमतीं अवलोक्य रामः।
सञ्जीवनाय भरतस्य समग्रभक्तेः
    सत्यप्रतिश्रवतयैव चकार राज्यम्॥ ८.२४ ॥

पादावनि ! प्रतिगतस्य पुरीमयोध्यां
    पौलस्त्यहन्तुरभिषेकजलार्द्रमूर्तेः।
अंसे यथार्हम् अधिवास्य निजैर्यशोभिः
    कस्तूरिकेव निहिता वसुधा त्वयैव॥ ८.२५ ॥

याऽसौ चतुर्दश समाः पतिविप्रयुक्ता
विश्वंभरा भगवती विधृता भवत्या।
विन्यस्य तां रघुपतेर्भुजशैलशृङ्गे
भूयोऽपि तेन सहितां भवती बभार॥ ८.२६ ॥

निस्तीर्णदुःखजलधेरनघस्य देवि !
त्वत्संप्रयुक्तरघुनाथपदान्वयेन।
सद्यः सनन्दनमुखैरपि दुर्निरीक्षा
साम्राज्यसंपदपरा भरतस्य जज्ञे॥ ८.२७ ॥

निर्गत्य देवि ! भरताञ्जलिपद्ममध्यात्
भूयः समागतवती पुरुषोत्तमेन।
पद्मेव भद्रमखिलं मणिपादरक्षे
प्रादुश्चकार भवती जगतां त्रयाणाम्॥ ८.२८ ॥

रघुपतिमधिरोप्य स्वोचिते रत्नपीठे
प्रगुणम् अभजथास्त्वं पादुके ! पादपीठम्।
तदपि बहुमतिस्ते तादृशी नित्यमासीत्
क्व नु खलु महितानां कल्प्यते तारतम्यम्॥ ८.२९ ॥

अनुवृत्तरामभावः शङ्के निर्विष्टचक्रवर्तिपदाम्।
अधुनाऽपि रङ्गनाथः सचमत्कारं पदेन भजति त्वाम्॥ ८.३० ॥

॥ इति श्रीपादुकासहस्रे निर्यातनापद्धतिः अष्टमी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥